# श्री संकट मोचन हनुमत स्तोत्रं

सिन्दूरपूर रुचिरो बल वीर्य सिन्धुर्बुद्धिप्रवाहनिधिरद्भुत वैभवश्री: |
दीनार्तिदाव दहनो वरदो वरेण्य: संकष्टमोचन विभुस्तनुतां शुभं न: || १ ||

सोत्साहलङ्घित महार्णव पौरुषश्री र्लङ्कापुरी प्रदहन प्रथित प्रभाव: |
घोरावहप्रमथितारिचमूप्रवीर: प्राभञ्जनिर्जयति मर्कट सार्वभौम: || २ ||

द्रोणाचला नयनवर्णित भव्यभूति: श्री राम लक्ष्मण सहायक चक्रवर्ती |
काशीस्थ दक्षिण विराजितौध मल्ल: श्री मारुति र्विजयते भगवान् महेश: || ३ ||

नूनं स्मृतोपि दयते भजतां कपीन्द्र: सम्पूजितो दिशति वांछित सिद्धि वृद्धिम् |
सम्मोदक प्रिय उपैति परं प्रहर्ष रामायण श्रवणत: पठतां शरण्य: || ४ ||

श्री भारतप्रवरयुद्धरथोद्धतश्री: पार्थैककेतनकराल विशालमूर्ति: |
उच्चैर्घनाघन घटा विकटाट्टहास: श्रीकृष्णपक्ष भरण: शरणं ममास्तु || ५ ||

जङ्घालजङ्घ उपमाति विदूरवेगो मुष्टिप्रहार परिमूर्च्छित राक्षसेन्द्र: |
श्रीरामकीर्तित पराक्रमणोद्भवश्री: प्राकम्पनिर्विभुरुदतु भूतये न: || ६ ||

सीतार्ति दारुण पटु: प्रबल: प्रतापी श्री राघवेन्द्र परिरम्भवरप्रसाद: |
वर्णीश्वर: सविधिशिक्षित कालनेमि: पाननोपनयतां विपदोधि देशम् || ७ ||

उद्यद्भानु सहस्त्रसं निभतनु: पीताम्बरालंकृत:
प्रोज्ज्वालानल दीप्यमान नयनो निष्पिष्ट रक्षोगण: |
संवर्तोद्यतवारिदोद्धतरव: प्रोच्चैर्गदा विभ्रम:
श्रीमान् मारुत नन्दन: प्रतिदिनं ध्येयो विपद्भञ्जन: || ८ ||

www.viswakalyanam.org





With Blessings :
'Mahadacharya' KALYANASASTRY AMANCHI
website : www.viswakalyanam.org, mailid : kalyanasastry@viswakalyanam.org,
17-38(B), Road Behind Ayyappa Temple, Ramamandir Street, CHIRALA,
Pin : 523 155, Prakasam District, (A.P.), INDIA.
India Ph. : 91-9248581234, Usa Ph. : 614+874+9133

रक्ष:पिशाच भय नाशन मामयाधि प्रोच्चैर्ज्वरापहरणं दमनं रिपूणाम् |
सम्पत्तिपुत्र करणं विजय प्रदानं संकष्टमोचन विभो: स्तवनं नराणाम् || ९ ||

दारिद्र यदु:खदहनं विजयं विवादे कल्याण साधन ममङ्गल वारणं च |
दाम्पत्य दीर्घसुख सर्वमनोरथाप्तिं श्री मारुते: स्तव शतावृतिरातनोति || १० ||

स्तोत्रं य एतदनुवासरमस्तकाम: श्री मारुतिं समनुचिन्त्य पठेत् सुधीर: |
तस्मै प्रसाद सुमुखो वर वानरेन्द्र: साक्षात्कृतो भवति शाश्वतिक: सहाय: || ११ ||

संकष्ट मोचन स्तोत्रं शंकराचार्य भिक्षुणा । महेश्वरेण रचितं मारुते श्चरणेर्पितम् ||

|| इति श्री संकट मोचन हनुमत स्तोत्रं सम्पूर्णं ||





With Blessings :
'Mahadacharya' KALYANASASTRY AMANCHI
website : www.viswakalyanam.org, mailid : kalyanasastry@viswakalyanam.org,
17-38(B), Road Behind Ayyappa Temple, Ramamandir Street, CHIRALA,
Pin : 523 155, Prakasam District, (A.P.), INDIA.
India Ph. : 91-9248581234, Usa Ph. : 614+874+9133